सनुताद्यन्प्रत्ययो भवति यत्रोपसर्वत्र समानस्य छन्दसीति भावः । तुग्राद्घन् तु
ग्रशब्दाद्घन्प्रत्ययो भवति यतोपवादः । स्वरे विशेषः । त्वमग्ने वृषभस्तुग्नि
याणां अन्नाकाशयत्नावरिष्ठेषु तुग्रम्व । अग्राद्यत् अग्रशब्दाद्यत्प्रत्ययो भ
वति तत्रभव इत्येतस्मिन्विषये अग्रे भवमग्र्यं किमर्थमिदं यावता सामान्येन यद्वि
हित एव घच्छौ चेति वक्ष्यति तस्याभावो बाधा माभूदिति पुनर्विधीयते घच्छौ च अग्राद
न घच्छौ प्रत्ययौ भवतः तत्रभव इत्येतस्मिन्विषये अग्रियं अग्रीयं चकारस्तुग्रा
द्घन् इति अस्य चानुकर्षणार्थः । अग्रियं स्वरे विशेषः । समुद्राभ्राद्घः । समुद्र
शब्दादभ्रशब्दाच्च घप्रत्ययो भवति तत्रभव इत्येतस्मिन्विषये सोपवादः । समुद्रे
नदीनां आभ्रियस्येव घोषः । अभ्रशब्दस्यापूर्वनिपातनं । तस्य लक्षणस्य व्यभिचारि
त्वात् । बर्हिषि दत्तं भव इति निवृत्तं बर्हिः । शब्दात्सप्तमीसमर्थाद्दत्तमित्येतस्मि
न्नर्थे यत्प्रत्ययो भवति बर्हिष्येषु निधिषु प्रियेषु । दूतस्य भागकर्मणी निर्देशादेव
समर्थविभक्तिः दूतशब्दात्षष्ठीसमर्थात् भागे कर्मणि चाभिधेये यत्प्रत्ययो भवति भा
गो दूत्यं कर्म क्रिया यत्र गमने दूत्यं दूतभागः । रक्षोयातूनां हननी निर्देशादेव
समर्थविभक्तिः । रक्षःशब्दात् यातुशब्दाच्च षष्ठीसमर्थात् हननी इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति
हन्यतेऽनयेति हननी या ते अग्ने रक्षस्या तनूः । रक्षोहननी यातव्या यातुना हननी बहुव
चनं प्रकृतिवैशिष्ट्यार्थं रक्षसां हननी तनूः । रेवतीजगतीहविष्याभ्यः प्रशस्ये
प्रशस्ये रेवत्यादिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः प्रशंसावाचिभ्यो यत्प्रत्ययो भवति प्रशंसनमप्र
शस्यं भावे क्यप्प्रत्ययो भवति रयिवो रेवती रेवत्यं यज्ञो जगती जगत्यं यज्ञो हविष्या ह
विष्यं हविष्या हविः तासां प्रशंसनं दावे ... इति लोपे कृते हविलोपयमो
यामि इति लोपः । असुरस्य स्वं असुरशब्दात् षष्ठीसमर्थात् स्वमित्येतस्मिन्नर्थे य

[illegible]

स्वस्तिनवानपि यथा मूर्द्धोनयः प्रजापतिं सर्वन्ति तत्रवयस्य वन्तूपवान्तूइवस्तूइ
नन्तूपवाद्दापि यतिप्राप्ते मतुपूविधीयते मूर्द्धन्वानित्यपधानि वयस्या पुत्रतामूर्द्ध नू
न्तूपवादापि यति प्राप्ते मतुप्विधीयते मूर्द्धन्वानित्यपदानि वयस्याप्तौ तथा मूर्द्धन्
स्वस्य वयस्या इति किं यत्र मूर्द्धन्नन्तूपवएव केवलो नवयः तावत् नन्तो वा भूत
मूर्द्धन्वानित्युनि वन्नूपवे मूर्द्धन् इत्युक्ते मतुपोऽ... कर्माविनीचे चेत् कृत्ता मावयो मास
नन्तो यास्मिन्नस्ये मतुपविहितः नास्मिन्नर्ह्यपदसिविजये योऽस्य त्वयो भवति सो
सनन्त्यो प्रत्ययोपवृत्तिर्गणयोः प्रथमा समापात् अप्रत्ययपादिकात् प्रयुक्ते
सपस्यर्थे वपस्तौ त्वयो भवति मत्वर्थीयानाम् अपवादः तमोऽस्ति विद्यते यस्मिन्सा
सेनभमासः तपस्यः मधव्यः नभान्तूवो भ्यौ पूर्वन्तेन नत्वा चेत्वपि ऊर्जः स्मा
लोपिपते ऊर्जस्वी तनु इत्यनुवर्तते मासतन्त्वोरिति किं मधुमत्ताप्रवत्तेणाचरति मासतन्त्वोरनन्तर्यो
ऽत्रवा मधास्मिन्नस्तिमधास्मिन्नन्तेन तररिति वा मधव्यो मासः लुगकारेकारदेफाश्च वन्नव्यालु
कात्तानन्तु नपश्च तपस्यश्च नभस्यश्च सहश्च नपुंसकलिंगं छादसत्वानु अकारः इत्रो
मासः ऊर्जो मासः इकारश्च चि मौसइफः शुक्लो मासः मधो ऋश्च मधुन्तूपवोन्तू मत्वर्थे प्र
प्रत्ययो भवति चकारात् यज्ञ उपसंख्यानात् लुकचेः माधवः मधवः मधव्यः मधुन्तन्तो
चेत्नुपि माधवा माधव्या मधुः तन्नू ऊर्जसो हानि यत्नलो मत्वर्थे इत्येव ऊर्जः तूपवोन्तू म
त्वर्थे यत्नुलो प्रत्ययो भवतः प्रकृत्यभिधेये ऊर्जस्वमहः ऊर्जस्वीतं वेन्तूगे यन्तूप्यादेम
गाद्यत्नु मत्वर्थे इत्येव विन्तूगे यन्तूसीप्रादीयस्य प्रातिपदिकस्य तस्मान्नु वेन्तूगे यन्तू
प्रदेर्म गान्तानु प्रातिपदिकात्नु मत्वर्थे यत्नुप्रत्ययो भवति लकारः स्वराथे वेन्तूमे
गो स्यवियते वेन्तूगे भगणः यन्तूगे भगः वेदरूपिल लमुच्चाते श्री कामपवयन्त्तमीयो

न्या वीर्ये यतु सोमभगत्वाद् । वेन्नु सोमभगः आज्ञन्नति विं जु यो मगः । लव वेन्नो य मुन्यादे
र्भागं तान्याति । दि कान्न त्वर्थे लिप्त न्य यो भवति वेन्नो भगीनः । यन्नो भगो नः । यो
विभागो यथा संख्येनिमासार्थ । उत्तरार्थश्च पूर्वे कृतनिनयोश्च मत्वर्थ इतिनि
र्वृत्तं । निर्देशादेव समर्थविभक्तिः पूर्ववृत्त्या व्यानन्तनीयास समर्थान् कृतमित्येत
। स्मिन्नर्थे इनय इत्येतेप्रत्ययौ भवतः । चकारात्तवचः । पथिभिः पूर्वितोः पूर्वैः
पूर्वैः । रितिव फुवचनं तेन पूर्वपुरुषाद्यचये नत्तकृतार्थं प्रत्ययान । प्रत्ययाः इति व
यो प्रत्ययः सा आदिः । संस्कृतं निर्देशादेव समर्थविभक्तिः । अत्र वृत्त्या व्यानन्तनीयास
मर्थान संस्कृतामित्येतस्मिन्नर्थे यः प्रतियोभवति यस्येदमप्यं हविः । आदिः
संस्कृतामितिः सहस्रेण संमितो घः । निर्देशादेव समर्थविभक्तिः । सहस्रेणत्या व्यो
ननीयाः समर्थान् संस्कृतइत्येतस्मिन्नर्थे यप्रत्ययो भवति संमितस्तुल्यः स
हस्रः । अय माति सहस्रियः । सहस्रेण तुल्य इत्यर्थः । केचित्तु संमितावि ति नत्राति संमि
ता संमित एव लक्ष्यायितव्यः । तत्र छंदसि प्रयोगदर्शनात् मतौ च मत्वर्थे च सह
स्रं ग्रहणाद्य प्रत्ययो भवति सहस्रम स्यास्ति यते सहस्रियः । तपः । सहस्रो भ्यो विनिंतो
गण नित्य स्याय पवादः । सोमम हति यः । निर्देशादेव समर्थविभक्तिः । सोमशब्दान्ताद्वि
तीया समर्थान् आहृतीत्येतस्मिन्नर्थे यप्रत्ययो भवति सोमम हति सोम्यः । ब्राह्म
णाः यज्ञाहाइत्यर्थः । यतिप्रकृतेयष्ट्रणां स्वरविशेषः । मयेच सोमंत्रहणं यत्र
स्यपश्चानुवर्तते मयडिति मयट्चौ तत्पुते सोमशब्दात् मयट्येयः । प्रत्ययो भव
ति आगतविकारावयव प्रकृतम यट्योः । हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । म
यच्च मयट्यो भाषायाम भक्ष्याच्छादनयोः कृत वचने मयटितिन्त्रयया ।

योगं समर्थविभक्तिः। सोम्यं मधु चवंति सोममयमित्यर्थः। मधोः। यन्नुवर्त्तते। मधु
शब्दात् मयडर्थे यत्प्रत्ययो भवति मधव्यान्। लोकं मधुमयानीत्यर्थः। वसोः समू
हे च। वसुशब्दात् समूहे वाच्ये यत्प्रत्ययो भवति चकारान्मयडर्थे च यथायो
गं समर्थविभक्तिः। वसव्यः समूहः। मयडर्थे वा। अक्षर समूहे छंदसः। स्वार्थेऽप
संख्यानं हेस्तावयति चानुरक्षाम् अग्निश्चोडिति चनुरक्षम्। यजेति व्यवहारे ये
यजाम इति पंचाक्षरं यदक्षरो वषट्कृचे एष वे सप्तदशाक्षरम्। छंदस्य। प्रजापति
यज्ञमंत्रे विहितः। सप्तदशाक्षरा गापि व छंदसि इत्यर्थः। छंदशब्दात् अक्षरसमूहे
वर्त्तमानात् स्वार्थे यत्प्रत्ययः। वसुशब्दात् अपि विषय छंदसि व्यः। हस्तौ पृणस्व बहु
भिर्वसव्यैरित्यर्थः। अग्निरीशे वसव्यस्य वसोरित्यर्थः। नक्षत्रान्नघः। नक्षत्रश
ब्दात् घप्रत्ययो भवति स्वार्थे समूह इति नानुवर्त्तते नक्षत्रियेभ्यः। स्वाहा। सर्वदे
वात्तातिल्। सर्वदेवशब्दाभ्यां तातिल्प्रत्ययो भवति छंदसि विषये स्वार्थिकः। स
र्वतातिः। शिवशमरिष्टस्य करे। करोतीति करः। धात्वर्थः। तस्मात् समर्थलभ्या षष्ठीस
मर्थविभक्तिः शिवादिभ्यः। प्रातिपदिकेभ्यः। षष्ठीसमर्थेभ्यः। कार इत्येतस्मिन् विषये
तातिल्प्रत्ययो भवति शिवं करोतीति शिवतातिः। शंतातिः। अरिष्टतातिः। भावे च। भा
वे चार्थे छंदसि विषये शिवादिभ्यः। प्रातिपदिकेभ्यस्तातिल्प्रत्ययो भवति। शिव
स्य भावः शिवतातिः। शंतातिः। अरिष्टतातिः। पूर्वो विधिरुक्तः। अन्यप्रत्ययो वि
कृते इति काशिकायां वृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः। ४ प्राक्क्रीताच्छः।
तेन क्रीतमिति वक्ष्यति प्रागेतस्मात् क्रीतसंशब्दनात् यानित ऊर्ध्वमनुक्रमिष्या
मः। छः। प्रत्ययः स्मेषु अधिकृतो वेदितव्यः। वक्ष्यति तस्मै हितं वत्सेभ्यो हितो वत्स
तीयः। करभीयः। अयो विधिच्चेन परिगृहीतो न प्रत्ययः। तेन च्छो कुठन्तः इति नो

॥ उगवादिभ्यो यत् प्राक्क्रीतादित्येव उवर्णान्तात् प्रातिपदिकात् गवादिभ्यश्च य
त् प्रत्ययो भवति प्राक्क्रीतीयेष्वर्थेषु छस्यापवादः। शंकव्यं दारु। पिचव्यः
कार्पासः। गवादिभ्यः खल्वपि गव्यं हविष्यं। सनङ्गुर्नाम चर्मविकारः। ततः प
रत्वाच्चर्मणोऽपीत्येष विधिः प्राप्नोति। चरुर्नाम हविः। स चान्नविकारः। अ
पूपादिष्वन्नविकारेभ्यश्चेति पठ्यते। ततो विभाषा हविरपूपादिभ्य इति प्राप्ते
ति तत्र पूर्वविप्रतिषेधेन यत्प्रत्यय एवेष्यते। सनङ्गव्यं चर्म। चरव्यास्तण्डुलाः।
सत्त्रव्याधानाः। इति गवादिषु नाभि नभं चेति पठ्यते। नाभिशब्दो यत्संनियोगेन
यति नभं चापद्यते नाभये हितो नभ्योऽक्षः। नभ्यमञ्जनम्। यत्तु शरीरावयवो नाभि
स्तु ततः शरीरावयवाद्यदिति यति कृते नाभये हितं नाभ्यं तैलमिति भवितव्यं ग
वादिः। यत्नाभेः सत्यपि तस्मिन्नभभावो न भवति। गो हविस् अष्टका बर्हिस् युग मेधा स्रुक्
नाभि नभं च शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वं च शुन्य। ऊध
सोऽनङ् च ऊधन्यः। कूप खद दर खर असुर विष २ कम्बलाच्च संज्ञायाम्। कम्बलशब्दा
दोत्सर्गे प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति संज्ञायां विषये छस्यापवादः। कम्बल्य
मूर्णापलशतं संज्ञायामिति किं कम्बलीयमूर्णा। ३ विभाषा हविरपूपादिभ्यः। हविर्वि
शेषवाचिभ्यः शब्देभ्यः अपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु विभाषा यत्प्रत्ययो भ
वति आमिक्ष्यं दधि। आमिक्षीयम्। तण्डुल्यं तण्डुलीयं अपूप तण्डुल पृथुक अभ्यूष
अभ्योष अवोष किण्व मुसल कटक कर्णवेष्टक इर्गल स्थूणा पूप दीप प्रदीप
अपूप पुत्र अन्नविकारेभ्यश्च। तस्मै हितम्। इति चतुर्थीसमर्थात् हितमि
त्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति वत्सेभ्यो हितो गोधुक् वत्सीयः। क
रभीयः। पटव्यं मृदङ्गवादनं हविष्यम्। ५ शरीरावयवाद्यत्। शरीरं प्राणिकायः। शरी

रवयवाचिनः प्रातिपदिकात् यत्प्रत्ययो भवति तस्मै हितमित्येतस्मि-
न्विषये छस्यापवादः। दन्तेभ्यो हितं दन्त्यं कर्ण्यं कण्ठ्यं नाभ्यं नस्यं। खलय-
वमाषतिलवृषब्रह्मणश्च। खलादिभ्यः। चतुर्थ्यन्तेभ्यो यत्प्रत्ययो भवति तस्मै
हितमित्येतस्मिन्विषये छस्यापवादः। खलाय हितं खल्यं यव्यं माष्यं ति-
ल्यं वृष्यं ब्रह्मण्यम्। वृषेभ्यो हितं ब्राह्मणेभ्यो हितमिति वाक्यमेवा छप्र-
त्ययमपि नेच्छन्त्यनभिधानात्। चकारोऽनुक्तसमुच्चयार्थः। तेन रथाय हितं
रथ्यम्। अजाविभ्यां थ्यन्। अजाविचतुर्थाभ्यां थ्यन्प्रत्ययो भवति तस्मै हितमि-
त्येतस्मिन्विषये छस्यापवादः। अजथ्या यूतिः। अविथ्या ऊर्णा। आत्मन्विश्वज-
नभोगोत्तरपदात्खः। आत्मन्विश्वजनशब्दाभ्यां भोगोत्तरपदाच्च प्रातिप-
दिकात् चतुर्थ्यन्तात् खप्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये छस्यापवादः।
आत्मन्निति नलोपो न कृतः। प्रकृतिचरिमाणाज्ञापनार्थः। तेनोत्तरपदगु-
णं भोगान्तेनैव सम्बध्यते न तु प्रत्ययेकम्। आत्मने हितमात्मनीनम्। आत्मा-
ध्वानौ खे इति प्रकृतिभावः। विश्वजनेभ्यो हितं विश्वजनीनम्। कर्मधारयादिष्य-
ते षष्ठीसमासात् बहुव्रीहेस्तु छ एव भवति। विश्वजनाय हितं विश्वजनीयम्।
पंचजनादुपसंख्यानम्। पंचजनीनम्। अत्रापि कर्मधारयादेव। पंचजनीयम-
न्यत्। सर्वजनात् ठञ् खश्च। सार्वजनिकं सर्वजनीनम्। अत्रापि कर्मधारया-
देव सर्वजनीयमन्यत्। महाजनान्नित्यं ठञ् वक्तव्यः। महाजनाय हितं माहा-
जनिकम्। तत्पुरुषादेव बहुव्रीहेस्तु छ एव भवति महाजनीयम्। भोगोत्तरपदा-
त् खल्वपि मातृभोगीणः। भोगशब्दः शरीरवाची केवलेभ्यो मात्रादिभ्यश्छ एव

भवति मात्रीयम् पित्रीयम् राजाचार्याभ्यां च नित्यम् भोगोत्तरपदाभ्यामेताभ्यां
खप्रत्यय इष्यते न केवलाभ्याम् राजभोगीनम् आचार्यभोगीनम् आचार्य
देणाच्चेच केवलाभ्यां वाक्यमेव भवति राज्ञे हितमाचार्याय हितमिति
१ सर्वपुरुषाभ्यां णढञौ सर्वपुरुषशब्दाभ्यां यथासंख्यं णढञौ प्रत्ययौ
भवतः तस्मै हितमित्येतस्मिन्विषये छस्यापवादौ सर्वाण्णस्य वावचन
म् सर्वस्मै हितं सार्वं सर्वीयम् पुरुषाद्वधविकारसमूहकृतेष्विति वक्त
व्यम् पौरुषेयो वधः पौरुषेयो विकारः समूहः पौरुषेयं समागतम् कृते
पौरुषेयो ग्रन्थः माणवचरकाभ्यां खञ् माणवचरकशब्दाभ्यां खञ्प्रत्य
यो भवति तस्मै हितमित्येतस्मिन्विषये छस्यापवादः माणवाय हितं माणवी
नम् चारकेभ्यो हितं चारकीणम् तदर्थं विकृतेः प्रकृतौ प्रकृतिरुपादानकार
णं तस्यैवोत्तरमवस्थान्तरं विकृतिः विकृतिवाचिनः प्रातिपदिकात् प्रकृ
तावभिधेयायां यथाविहितं प्रत्ययो भवति तदर्थमिति प्रत्ययार्थे विशेषणम्
तदिति सर्वनाम्ना विकृतिः प्रत्यवमृश्यते विकृत्यर्थायां प्रकृतौ प्रत्ययः
र्थग्रहणेन प्रकृतेरनन्यत्वाच्छलाल्पायते तेन प्रकृतिविकारसंभवमात्रे प्रत्ययः तप
किन्तर्हि प्रकृतेरनन्तेविवक्षिते प्रत्ययार्थस्य च तदर्थत्वे सामर्थ्ये लभ्यते चतुर्थी
समर्थविभक्तिः केचित्तु तस्मै इत्यनुवर्तयन्तीति अंगारेभ्यः एतानि अंगारीयाणि
काष्ठानि प्राकारीयाः इष्टकाः शङ्कव्यं दारु पिचव्यः कर्पासः तदर्थमिति किम्
यवानां धानाः धानानां सक्तवः प्रकृतिरनिवृत्तिरत्र विवक्षितानां तदर्थ
मुधानानां सक्तवो न तादर्थ्यमिति विकृतेरिति किं उदकाय कूपः विकृतिग्र

तणे क्रियमाणेण कालिन्त्र कृतिर्गृह्यते नोपादानं कारणमेव भवति यथा कुण्ड
कादयोस्य प्रकृतिः तत्रोत्पादनात् मोदकं न सुविकृतिः अयवत्तमेदानु प्र
त्रि कृताविति किम् अस्य छात्रो कोन्ता आसिरस्य सौविकृतिर्भवति न तु कौन्ती
तस्य प्रकृतिः द्वयोरपि प्रकृतिविकृत्योर्ग्रहणं क्रियमाणे विवक्षातः
प्रकृतिविकारभावो लभ्यते १२ छदिरुपधिबलेर्ढञ् छदिरादिभ्यश्चतुर्थ्यन्ते
भ्यो ढञ् प्रत्ययो भवति तदर्थाद्विकृतेः प्रकृताविति तस्मिन्विषये छस्या
पवादः छादिषेयाणि तृणानि औपधेयं दारु बालेयास्तण्डुलाः उपधिशब्दा
त्स्वार्थे प्रत्ययः उपधीयत इत्युपधिः रथांगं औपधेयमेव तत्र पथे बदारु १३
ऋषभोपानहोर्ञ्यः ऋषभउपानत्शब्दाभ्यां ञ्यः प्रत्ययो भवति तदर्थं
विकृतेः प्रकृताविति तस्मिन्विषये छस्यापवादः आर्षभ्यो वत्सः तदर्थं
चो मुंजः चर्मण्यपि प्रकृतित्वेन विवादेते पूर्वविप्रतिषेधादयमेव औपान
ते औपानह्यो चर्म १४ चर्मणोऽञ् चर्मण इति षष्ठी चर्मणो या विकृतिस्तद्वा
चिनः प्रातिपदिकादञ् प्रत्ययो भवति तदर्थं विकृतेः प्रकृताविति तस्मि
न्विषये छस्यापवादः वार्ध्रं चर्म वारत्रं चर्म १५ तदस्य तदस्मिन्स्यादिति
तदिति प्रथमासमर्थाद्विभक्तेरस्येति प्रत्ययार्थे स्यादिति प्रकृतिविशेष
णम् इति कारणे विवक्षायां एवं द्वितीये पि वाक्ये स्यादस्यै तत्प्रत्ययः इ
ष्टो तावान्विशेषः तदिति प्रथमासमर्थविभक्तेरस्येति प्रत्ययार्थे स्या
दिति कृतिविशेषणम् इति वरणे विवक्षायां एवं द्वितीये पि वाक्ये स्य
स्यै तत्प्रत्ययः इष्टे तावान्विशेषः तदिति प्रथमासमर्थात्प्रातिपदिका

त्वाष्ट्रं यं सृपन्मध्यं च यथा। विहितं प्रत्ययो भवति। यत्र यमास समृद्धं स्यस्य
त्र प्रवाति इति करणं तत्र श्रोपि विवक्षा प्राकारणा सामिष्टकानां स्यात्
का दृश्याष्टकौ प्रासादीयं दारु से तस्मात् छेवलम्बि। इ प्राकारोस्मिन्नु देष्टु
स्याः प्राकारो यो देष्टुः। प्रासादीय भूमिः। स्यादिति संभावने लिङ्। इष्टकानां
वैकृत्वेन संभाविता। एतस्मा प्राकारुणा सा स्यादिति देष्टुस्य च गुणो न संभा
वने लिङ्। इष्टकानां च कृत्वेन संभाविता एतस्मा प्राकारुणा सा स्यादिति दे
ष्टुस्य च गुणो न संभाव्यते प्राकारोस्मिन्नु स्यादिति प्रकृतिविकारभावे
स्यादष्ट्रौ चेद्गुणविवक्षितमनु किं तर्हि योग्यतामात्रमनु। तेन पूर्वं स्यायमवि
षयः। छिलद्रुहणं न्यपप्रस्थुप्रदष्टुनाष्ठमुग्यने कस्मिन्नुत याथें प्रत्ययेकं
समर्थविभक्तिः स वैधुनी चेति ... स्यान्नु भवति प्रसादादेवदत्तस्य स्यान्नु
गुणा वा न यं संभाव्यते प्रसाददत्ताभोस्योति इति करणं विवक्षार्थ इत्युक्तो मु
१६ परिखायाः ढञ्। परिखानाका तुम्बस्य प्रत्ययो भवति। तदस्य तदस्मिन्नु स्यादित्येत
स्मिन्विषये ... स्यापवादः। परिखेयी भूमिः। ... धुतो बधिः। ... परमन्तः।
प्रत्ययो विधीयते १७ प्रागवतेष्ठञ्। तेन तुल्यं क्रिया चेद्वतिरिति वत्प्रतेः प्रा
गतः स्याद्वतिं संशब्दनाद्यातिततऊर्ध्वमनुक्रमिष्यामः। ठञ्चैतत्प्रत्ययस्तेष्वधिकृतो
वेदितव्यः। वत्प्रति पारायणं तुरायणं चान्द्रायणं वर्तयति पारायणिकः। तौ
रायणिकः। चान्द्रायणिकः। १८ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। तदर्हतीति
रायणिकः। आर्हादिति संशब्दनाद्यातिततऊर्ध्वमनुक्रमिष्यामः। ठक्प्रत्यय
वत्प्रति ... वेदितव्यः। गोपुच्छादीन्वर्जयित्वा अभिविधौ चायमाकारः। अत्र
स्तेष्वधिकृतो ... भवति। ठञधिकारमध्ये तदपवादत्वाद्विधीयते वत्प्रतितेन क्रीतं नैष्कि
कं पाणिकम्। अगोपुच्छादेरिति किं गोपुच्छेन क्रीतं गौपुच्छिकम्। संख्या सांख्यातिकम्
आकृतिः। किं मु परिमाणं प्रास्थिकम् ... दादिः ... संख्यापरिमाणयो

को विशेषः । भेदगणनं संख्या एकत्वादि गुणस्तु मानम् मानं तुलादि यया आसमानं
का[?] प्रमाणं वितस्त्यादि । आरोहपरिणाहः मानं परिमाणं प्रस्थादि ऊर्ध्वमा
नं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् संख्या बाह्या
तु सर्वतः । असमासे निष्कादिभ्यः । आर्हादित्यं वा निष्कादिभ्यः तु द्वाभ्यां समा
से ठकुप्रत्ययो भवति आर्हीयेष्वर्थेषु ठञोपवादः । नैष्किकम् पाणिकम्
पादिकम् असमास इति किं परमनैष्किकम् उत्तमनैष्किकम् पाणिकम्
म् पादिकम् असमास इति किं परमनैष्किकम् उत्तमनैष्किकम् पाणिक
भवति अथ किमर्थमसमास इत्युच्यते यावता ठकप्रत्ययग्रहणं ठञेव
पदिको नु तदन्तविधिः । प्रतिविधत्ते निष्कादिषु समासग्रहणं ज्ञापयति
पूर्वं तु तदन्तात्प्रतिषेधस्य ज्ञापकं गवादिभ्यो यत् । गव्यम् मल्लं गव्यम् । यूति गव्यं विमो
को हविरपूपादिभ्यः । अपूप्यम् अपूपीयम् यवापूपीयम् । ...
त्य तदन्तविधिरपूप्यम् ... भवति इत्युक्तं च संख्यापूर्वपदानां
तदन्तविधिरिष्यते पारायणतुरायणचान्द्रायणं वर्जयित्वा पारायणिक
द्वैपारायणिकः । त्रैपारायणिकः । लुगन्तात्संख्यापूर्वान्नेष्यते । द्वाभ्यां शूर्पा
भ्यां क्रीतं द्विशूर्पम् द्विशूर्प्येण क्रीतमिति तदन्तविधेरभावादन्नन्त रूप्या
मित्यप्रत्ययो भवति समासान्तविधिस्तथापि नैव भवति द्विशूर्पिकम् त्रिशौर्पि
कम् तथा चोक्तं प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि इति
क चण माष वर्ण द्रोण षष्टि २० ... वनुते आर्हादि
स्तनुनाकात्ययास्यान्ताविंशतेर्नोप्रत्ययो भवतः । अष्टिनेविधेये आर्हीयेष्व
र्थेषु ठकनोपवादे ... शतिकम् शत्यम् ... इति
रिमाणमस्य ... संघः ... यानि ...

वत्लुनः प्रकृत्ययोरभिधाने इडागमप्रतिषेधो न भवति। शतेन क्रीतं शतिकम्। ऊनाक-
ऊनं शतम् शत्यम् ऊनटकं शतमिति वाक्ये न तत्र यार्थस्य शतत्वे गम्यमाने नञ्प्रत्ययः। त-
थाचोक्तम् शतप्रतिषेधे इत्यतिषेध इति चकारो समासः इत्यस्यानुकार्यं शतार्थे। द्वे
च शते चापि शतम्। द्विशतेन क्रीतं द्विशतिकम्। त्रिशतिकम्। आर्हणे। संख्यापू-
र्वपदानां तदन्तग्रहणमलुकि त्यनया इष्ट्या समासान्ता दपि ज्ञातम् २१ संख्यायाः
अतिशदन्तायाः कन्। गोपुच्छादि त्यस्य संख्याया अतिशदन्तायाः शदन्तायाः कन्प्र-
त्ययो भवति आर्हीयेष्वर्थेषु ठञोऽपवादः। पञ्चभिः क्रीतः पञ्चकः। पटः। बहुकः। गणि-
कः। अतिशदन्तायामिति किम्। साप्ततिकः। चात्वारिंशत्कः। अर्थवत इति संख्या
ग्रहणात् इह। पर्युदासो न भवति कातिकः। २२ वतोरिड्वा। वावेतस्य संख्यायाः
कन्प्रत्यये इडेव तस्य त्वनेनेडागमो विधीयते। वातो। परस्य कानो वा इडागमो
भवति तावतिकः। तावत्कः। यावतिकः। यावत्कः। चतोरिट्येव गणकः। बहुकः।
२२ विंशतित्रिंशद्भ्यां ड्वुन् असंज्ञायाम्। विंशतित्रिंशद्भ्यां ड्वुन्प्रत्ययो भवति अ-
संज्ञायामार्हीयेष्वर्थेषु ठञोऽपवादः। विंशकः। त्रिंशकः। असंज्ञाया-
मिति किं विंशतिकः। त्रिंशत्कः। कथं पुनरत्र कन् यावता अतिशदन्तायामिति
पर्युदासेन भवितव्यम्। योगविभागः कर्तव्यः विंशतित्रिंशद्भ्यां कन्प्रत्ययो भव-
ति ततो ड्वुन् असंज्ञायामिति २४ कंसाट्टिठन्। कंसशब्दात् टिठन्प्रत्ययो भवति आ-
र्हीयेष्वर्थेषु ठञोऽपवादः। टकारो ङीबर्थः। इकार उच्चारणार्थः। नकारः स्वरार्थः।
कंसिकः कंसिकी अर्द्धाच्चेति वक्तव्यम्। अर्द्धिकः। अर्द्धिकी कार्षापणाट्टिठन्व-
क्तव्यः प्रतिशब्दश्चादेशो वा वक्तव्यः। कार्षापणिकः। कार्षापणिकी प्रतिकः।
प्रतिकी २५ शूर्पादञन्यतरस्याम्। शूर्पशब्दादञ्प्रत्ययो भवति अन्यतरस्या-
मार्हीयेष्वर्थेषु ठञोऽपवादः। पक्षे सोऽपि भवति शौर्पम्। शाक्रीतः शौर्पिकम्
२६ शतमानविंशतिकसहस्रवसनादण्। शतमानादिभ्यः अण्प्रत्य-

यो भवति आर्हीयेष्वर्थेषु ठञ् आनो रूपकादयः शतमानेन क्रीतं शातमानम् वै
शतिकम् साहस्रम् वासनम् २७ अध्यर्द्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् आर्हादि
त्येव अध्यर्द्धशब्दः पूर्वो यस्मिन् तस्मादध्यर्द्धपूर्वात् प्रातिपदिकाद्द्विगोश्च प
रस्यार्हीयस्य लुग्भवति असंज्ञायां विषये अध्यर्द्धकंसम् द्विकंसं त्रिकं
सं अध्यर्द्धशूर्पम् द्विशूर्पम् त्रिशूर्पम् असंज्ञायामिति किम् पाञ्चलोहि
तिकम् पाञ्चकलापिकम् प्रत्ययान्तस्यापि द्विपणसंज्ञाग्रहणम् नवेत्य
त्ययोः तु संज्ञेति अध्यर्द्धशब्दः संख्यैवा किमर्थं भेदेनोपादीयते ज्ञापनार्थ
म् क्वचिदस्य संख्याकार्यं न भवति संख्यायाः क्रियाभ्यावृत्तिगणन इति २८
विभाषा कार्षापणसहस्राभ्याम् अध्यर्द्धपूर्वद्विगोः कार्षापणसहस्रान्ता
त्परस्य प्रत्ययस्य लुग्भवति विभाषा पूर्वेण नित्ये लुकि प्राप्ते विकल्प्य
ते अध्यर्द्धकार्षापणम् अध्यर्द्धकार्षापणिकम् द्विकार्षापणम् द्विकार्षापणि
कम् त्रिकार्षापणं त्रिकार्षापणिकम् उपसंख्यानिकस्य टिठनो लुकि प्रतेः
पणे चेत्प्रतिशब्दे च विकल्पनं अध्यर्द्धप्रतिकम् द्विप्रतिकम् सहस्रान्ता
अध्यर्द्धसहस्रम् अध्यर्द्धसाहस्रम् द्विसहस्रं द्विसाहस्रम् त्रिसहस्रम् त्रिसा
हस्रम् सुवर्णशतमानयोरुपसंख्यानम् अध्यर्द्धसुवर्ण
म् अध्यर्द्धसौवर्णिकम् अध्यर्द्धशतमानम् अध्यर्द्धशातमानम् द्विशतमानम्
द्विशातमानम् त्रिशतमानम् त्रिशातमानम् द्वित्रिपूर्वान्निष्कात् द्वित्रिपूर्वा
त् द्विगोर्निष्कान्तात् प्रातिपदिकात् परस्य प्रत्ययस्य लुग्भवति विभाषा द्विनिष्कम् द्विनै
ष्किकम् त्रिनिष्कं त्रिनैष्किकम् बहुपूर्वाच्चेति वक्तव्यं बहुनिष्कम् बहुनैष्कि
कम् ३० बिस्ताच्च द्वित्रिपूर्वादिति च कोऽर्थानुकृष्यते द्वित्रिपूर्वाद्विस्तान्ताद्विगोः
आर्हीयस्य विभाषा लुग्भवति द्विबिस्तम् द्विबैस्तिकम् त्रिबिस्तम् त्रिबैस्तिकम् द्विगो
बहुपूर्वाच्च बहुबिस्तम् बहुबैस्तिकम् ... द्विकम् त्रिकम् तेन

तिमूल्याच्चकरणे न तृतीयासप्तम्यौ विभक्तिः । अन्यत्रानभिधानान्न भवति देवदत्ते-
न क्रीतं प्राणिना क्रीतमिति द्विवचनबहुवचनान्तादपि प्रत्ययो भवति
प्रस्थाभ्यां क्रीतं प्रस्थैः क्रीतमिति अनभिधानादेवा यत्र तु प्रकृत्यर्थस्य सं-
ख्या मेयाविगमे प्रमाणमाति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भव-
त्येव द्वाभ्यां क्रीतं द्विकं त्रिकं पंचकमिति तस्या मुद्गैः क्रीतं मौद्गिकम् तच्चैके
न मुद्गेन क्रियः संभाव्यते सू ७ तस्य निमित्तं संयोगोत्पादौ तस्येति षष्ठीसमर्था-
त्प्रातिपदिकान्निमित्तमित्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यन्निमि-
त्तं संयोगश्चेत्स भवति उत्पातो वा संयोगः संबंधः प्राणिनां शुभाशुभसूचको
महाभूतपरिणाम उत्पातः । शतस्य निमित्तं दानपतिना संयोगः । शत्यः । शा-
तिकः । साहस्रः । उत्पातः । खल्वपि शतस्य निमित्तं दक्षिणाक्षिस्पंदनं शत्यं शा-
तिकं साहस्रम् तस्य निमित्तं प्रकरणो वातपित्तश्लेष्मभ्यः शमनकोपनयोरु-
पसंख्यानम् वातस्य शमनं कोपनं वा वातिकं पैत्तिकं श्लैष्मिकम् सान्निपा-
ताच्चोनिवर्हंव्यम् सांनिपातिकम् २० गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् गो-
शब्दाद्व्यचश्च संख्यापरिमाणाश्वादिवर्जिताद्येत्प्रत्ययो भवति तस्येति निमित्त-
संयोगोत्पातावित्येतस्मिन्विषये ठञादेरपवादः गोनिमित्तं संयोग उत्पा-
तो वा गव्यः । द्व्यचः । खल्वपि धनस्य निमित्तं धन्यः । स्वर्ग्यः । यशस्यः । आयुष्यः । अ-
संख्यापरिमाणाश्वादेरिति किम् पंचानां निमित्तं पंचकः । अष्टकः । परिमाणात्
प्रास्थिकः । खारीकः । अश्वादि आश्विकः । ब्रह्मवर्चसादुपसंख्यानम् ब्रह्मवर्चस-
निमित्तं गुरुणा संयोगः । ब्रह्मवर्चस्यः । अश्वगणस्त्वनु गणः उणादिमांसंगावा[illegible]
२१ पुत्राच्छ च पुत्रशब्दाच्छः प्रत्ययो भवति चकाराद्यच्च तस्य निमित्तं संयोगो-
त्पातावित्येतस्मिन्विषये पुत्रच्छ[illegible] यति प्रादेवचनं पुत्रस्य निमित्तं ।

संयोग उत्पातो वा पुत्रीयः पुत्र्यः ॥ सर्वभूमिपृथिवीभ्यामणञौ ॥ सर्वभूमि
पृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः । तस्य निमित्त
संयोगोत्पाताविवेतस्मिन्नर्थे ठकोऽपवादौ । सर्वभूमेर्निमित्तं संयो
ग उत्पातो वा सार्वभौमः । सर्वभूमेरनुशतिकादिपाठादुभयपदवृद्धिः
॥ तस्येश्वरः । तस्येति षष्ठीसमर्थाभ्यां सर्वभूमिपृथिवीभ्यां यथा
संख्यमणञौ प्रत्ययौ भवतः । तस्येश्वर इत्येतस्मिन्नर्थे सर्वभूमेरीश्वरः
सार्वभौमः । पार्थिवः । षष्ठीप्रकरणात्पुनः समर्थविभक्तिनिर्देशः प्रत्य
यार्थस्य निवृत्त्यर्थमन्यथा हि संयोगोत्पाताविवेश्वरावपि प्रत्य
स्युर्विशेषणानामभावात् ॥ ४२ तत्र विदित इति च ॥ तत्रेति सप्तमीसमर्थाभ्यां
सर्वभूमिपृथिवीशब्दाभ्यां विदित इत्येतस्मिन्नर्थे यथासंख्यमणञौ प्र
भवतः । विदितः । विज्ञातः । प्रकाशित इत्यर्थः । तस्मिन्नर्थे यथासंख्यमणञौ प्रत्ययौ
वः ॥ लोकसर्वलोकाट्ठञ् ॥ लोकसर्वलोकाभ्यां सर्वभूमौ विदितः सार्वभौमः । पार्थि
दित इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति ठकोऽपवादः लोकशब्दाभ्यां सप्तमीसमर्थाभ्यां वि
सार्वलौकिकः । अनुशतिकादिपाठादुभयपदवृद्धिः । लोके विदितो लौकिकः ।
षष्ठीसमर्थाद्वाप इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥ ४४ तस्य वापः । तस्येति
वापः । क्षेत्रमुच्यते प्रस्थस्य वापः । क्षेत्रं प्रास्थिकं द्रौणिकं खारीकम् । उप्यतेऽस्मिन्निति
त्ष्ठन् ॥ पात्रशब्दात्ष्ठन् प्रत्ययो भवति तस्य वाप इत्येतस्मिन् लौकिकम् ॥ ४५ पात्रा
वापः । नकारः स्वरार्थः । षकारो ङीषर्थः । पात्रिकी । तस्मिन्नेव विषये ठञोऽप
यः प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति प्रत्ययस्य वा
प्रथमासमर्थं वृद्ध्यादि चेत्तद्भवति दीयते इत्येकवचनं न च प्रादिभिः । पञ्चकम्

काशिका ११६

bhidhīyate tatrādhamarṇenottamarṇāya mūladhanātiriktaṃ deyaṃ vṛddhiḥ grāmādiṣu svāmigrāhyo bhāga āyaḥ, paṭādīnāṃ mūlātiriktaṃ dravyaṃ lābhaḥ, sthānaiḥ rakṣānirvartako bhāgaḥ śulkaṃ, utkocaḥ upadā pañcāsmin vṛddhir vā āyo vā lābho vā śulko vā upadā vā dīyate pañcako devadatte, siddhyartham adhikaraṇavacanaṃ vivakṣitatvāt samarthavibhaktir kāleneti dānam iti 47 pūraṇārdhāṭ ṭhan pūraṇavācinaḥ ardhaśabdāc ca ṭhan pratyayo bhavati tad asmin dīyate ity etasmin viṣaye dvitīyam asmin dīyate dvitīyikaḥ, tṛtīyikaḥ, pañcamikaḥ, saptamikaḥ, ardhikaḥ, ardhaśabdo rūpakasyārdhe rūḍhaḥ, 48 bhāgād yac ca bhāgaśabdād yat pratyayo bhavati cakārāt ṭhan ca tad asmin vṛddhyāyalābhaśulkopadā dīyata ity etasmin viṣaye ṭhañapavādaḥ, tad asmin vṛddhyādi dīyate bhāgyaṃ bhāgikaṃ śatam bhāgyā viṃśatiḥ, bhāgikā bhāgo rūpakārdhasyābhidhāyakaḥ, 49 tad dharati vahaty āvahati bhārād vaṃśādibhyaḥ, tad iti dvitīyāsamarthāt harati vahati āvahati ity eteṣv artheṣu bhārāt vaṃśādibhyaḥ paraṃ yat prātipadikaṃ tasmāt ṭhañ pratyayo bhavati bhārād vaṃśādibhya iti vaṃśādibhyaḥ, paro bhāraśabdaḥ bhavati prakṛtiviśeṣaṇaṃ bhārād vaṃśādibhya iti vaṃśādibhyaḥ, paro bhāraśabdaḥ tadantāt prātipadikād iti vaṃśabhāraṃ harati vahati āvahati vā vāṃśabhārikaḥ, kauṭajabhārikaḥ, bālvajabhārikaḥ, bhārād iti kim vaṃśaṃ harati vaṃśādibhya iti kiṃ vrīhibhāraṃ harati tripaśca(?) vṛtti, bhārād vaṃśādibhyaḥ bhārabhūtebhyo vaṃśādibhya ity anye, bhārabhūtā vaṃśādibhyo harati vahati vā vāṃśikaḥ, kauṭajikaḥ, bālvajikaḥ, bhārād iti kim vaṃśaṃ harati vaṃśādibhya iti kiṃ vrīhibhāraṃ harati tatrārthaḥ ayam api cetanācetanayoḥ prāpyaṃ pratipādito, tad ubhayam api grāhyam deśāntaraṃ prāpayati coraḥ, āvahati utpādayati ity arthaḥ, āvahati utpādayati ity arthaḥ, vaṃśa kuṭaja balvaja mūla sthūṇākṣa

१८८

वा ग्राम्यं इत्यत्र एव तु ५७ वसन्तकृत्याभ्यां ठनकनौ वसन्तकृत्याद्वा द्व्यचाद्वाच्च द्वि
तीयासमर्थात् तु इत्यस्मादिष्वर्थेषु यथासंख्येन ठनकनौ प्रत्ययौ भवतः
वसन्तं हरति वहति आवहति वा वासन्तिकः एवं कार्त्तिकः ५८ संभवत्यव
हरति पचति तद्धितद्वितीयासमर्थविभक्तिरनुवर्त्तते तद्धितद्विती
यासमर्थात् प्रातिपदिकात् संभवत्यादिष्वर्थेषु यथाविहितप्रत्ययो
भवति तत्राधेयस्य प्रमाणानतिरेकः संभवः उपसंहरणमवहारः वि
क्लेदनं पाकः प्रस्थं संभवत्यवहरति पचति वा प्रास्थिकः कौडविकः कटाहः खा
रीकः ननु च पाकोऽपि संभवो विघ्नेनात्र स्यपत्र निष्यो ... प्रस्थं पचति प्रास्थि
ती प्रास्थिकी तत्र च तीति द्रोणं द्रोणं पचति द्रौणी द्रौणिकी ५९ आढकाचि
तपात्रात् खोऽन्यतरस्याम् आढकाचितपात्रात् द्वितीयासमर्थेभ्यः सं
भवत्यादिष्वर्थेषु अन्यतरस्यां खप्रत्ययो भवति ठञोऽपवादः पक्षे सोऽपि भव
ति आढकं संभवति अवहरति पचति वा आढकीना आढकिकी आचि
तिकी आचितीना पात्रीणा पात्रिकी ६० द्विगोः ष्ठंश्च आढकाचितपात्रा द्वि
गोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति
चकारात् खश्चान्यतरस्यां तत्र द्विधा सामर्थ्यात् अनयोर्नु लुगुवचनेभ्य ...
पक्षे ... द्विगोर्निमित्ते लुक् भवत्येव नकारः ङीबर्थः
द्व्याढकिकी द्व्याढकीना द्व्याढकी ... आढकिकी आढकीनी आ
चितिकी द्व्याचितीना द्व्याचितीनी आचितिकी त्र्याचितीना त्र्याचिती
द्विपात्रिकी द्विपात्रीणा द्विपात्री त्रिपात्रिकी त्रिपात्रीणा त्रिपात्री ६४ कुलिजा
ल्लुक्खौ च द्विगोः ... कुलिजात् द्विगोः संभवत्यादिष्वर्थेषु लुक्
खौ भवतः चकारात् ष्ठंश्च अन्यतरस्याम् ... तृणां लुगाचिविकल्प

ते: ठञ्। पदोऽश्रवणं भवति ते न चात्र रूपं भवति। द्वैकुलिजे न भवति अत्र
कमाति पञ्चाजिवा द्विकुलिजो द्विकौलिजीनो द्विकुलिजिकी परिमाणं तेस्या संज्ञाणा
ण यो मित्यत्र कुलिजग्रहणमपीष्यते तेनोत्तरपदवृद्धिर्न भवति ५५ सोऽस्यां
शवस्नभृतयः। सङ्ख्यायाः प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भ
वति यत्तत्प्रथमासमर्थं मत्वर्थे ... अंशश्चेद्भवति अंशो भागः। वस्नो मू
ल्यं मूल्यं भृतिर्वेतनम्। पञ्चांशो वा वस्नो वा भृतिर्वा अस्य पञ्चकः। सप्तकः। शत्यः।
शतिकः। साहस्रः। ५८ तदस्य परिमाणम्। तदिति प्रथमासमर्थादस्येति षष्ठ्य
र्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं परिमाणं चेत्तद्भव
ति प्रस्थः परिमाणमस्य प्रास्थिको राशिः। कौडविकः। खारीकः। शत्यः। शतिकः।
वर्षशतं परिमाणमस्य वार्षशतिकः। षष्टिर्जीवितपरिमाणमस्य षाष्टिकः।
साप्ततिकः। समर्थविभक्तिः प्रत्ययार्थश्च पूर्ववत्। तत्र देवानुवादेऽप्यते किम
र्थं न योऽपादानं पुनर्विधानं यथेमम्। द्वेषष्टी जीवितपरिमाणमस्य द्विषाष्टिकः।
त्रिषाष्टिकः। द्विसाप्ततिकः। त्रिसाप्ततिकः। पुनर्विधानं सामर्थ्यं दर्शयितुं पूर्वं द्विगो
रिति लुग्भवति ५७ सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु तदस्य परिमाणमित्य
नुवर्तते सङ्ख्यावाचिनः परिमाणोपाधिकात्प्रातिपदिकात्प्रथमासमर्था
दस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति संज्ञासङ्घसूत्राध्ययनेषु। निवृत्त
दस्येति विशेषणम्। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। पञ्चैव पञ्चकाः। शकुनयः।
त्रिकाः। शालङ्कायनाः। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। पञ्चैव पञ्चकाः। शकुन
यः। त्रिकाः। शालङ्कायनाः। पञ्चपरिमाणमस्य पञ्चकः सङ्घः। सप्तकः। अष्टकः। सू
त्रे अष्टाध्यायाः परिमाणमस्य अष्टकं पाणिनीयम्। दशकं वैयाघ्रपदीयम्। त्रि
कं काशकृत्स्नम्। ननु चाध्यायसमूहः। सूत्रे सङ्घ एव भवति नैतदस्ति शास्त्रे
स्वरूपे सङ्घातो नोच्यते। अध्ययने पञ्च कौशीनः। सप्तकाः। अष्टकाः। अधीतिरध्याय

नमु तस्य संख्यापरिमाणं पंचवृत्तयः। पंचका कुल्याः। पंचत्ता प्रायं स्वाध्याय
नस्य पंचका सध्ययनं मन्त्रो नेदवि पि पंचदशाः पर्यं। पंचदशो मंत्राः। परि
माणमस्य स्तोमस्य पंचदशः स्तोमः। सप्तदशः। एकविंशः। शान्तशो ङिति
श्च। देशिनकम्। पंचदशिनो मासाः। त्रिंशिनो मासाः। विंशतेश्चेति का
विंशिनो गिरसः। ५७ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशी
तिनवतिशतम्। तदस्य परिमाणमित्यर्थे ते पंक्त्यादयः। शब्दा निपात्यंते य
दिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम्। पंचानां टिलोपस्तिश्च
२८८ प्रत्ययः। पंच पदानि परिमाणमस्य पंक्तिश्छंदः। द्वयोर्दशतोर्विंशभावः। शति
श्च प्रत्ययः। द्वौ दशतौ परिमाणमस्य संघस्य विंशतिः। त्रयाणां दशतां त्रिंशभा
वः। शच्च प्रत्ययः। त्रयो दशतः। परिमाणमस्य त्रिंशत्। चतुर्णां च। त्वारिंभावः। शच्च
प्रत्ययः। चत्वारो दशतः। परिमाणमस्य चत्वारिंशत्। पंचानां दशतां पंचाशभा
वः। शच्च प्रत्ययः। पंच दशतः। परिमाणमस्य पंचाशत्। षण्णां तिप्रत्ययः। ष
पदत्वं च। षड् दशतः। परिमाणमस्य षष्टिः। सप्तानां तिप्रत्ययः। सप्त दशतः। परि
माणमस्य सप्ततिः। अष्टानामशीभावः। तिश्च प्रत्ययः। अष्टौ दशतः। परिमाण
मस्य सप्ततिः। अष्टानामशीभावः। तिश्च प्रत्ययः। अष्टौ दशतः। परिमाणमस्य
अशीतिः। नवानां तिः प्रत्ययः। नव दशतः। परिमाणमस्य नवतिः। दशानां शभावः
तश्च प्रत्ययः। दश दशतः। परिमाणमस्य शतम्। विंशत्यादयो गुणवचनाः
च्या यथा कथं विशेषणानीयाः। नात्राग्रहो नाग्रहो इति तेषु व्यस्त। यथा हि पंक्ति
रिति क्रमसंनिवेशे पिनत्रेत यथा ब्राह्मणपंक्तिः। पिपीलिकापंक्तिः। न चात्राव
यवायवकक्रिदमि यो चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिः। स्वलिंगाव
व्यानुविधानं च। तदपि सर्वं स्वाभाविकमेव। स्वकस्वादयोऽपि विंशत्यादयो लिंगा
व द्रष्टव्याः। उदाहरणमात्रमेतदिति ५८ पंचदशतौ वर्गे वा। पंचन् दशन्निति

तौ शब्दौ वा निपात्येते वर्गेभिधेये तदस्य परिमाणमित्येतस्मिन्विषये संख्याया इति क
न्प्रत्यये प्राप्ते निपात्यते वचनात्पक्षे सोपि भवति पंचपरिमाणमस्य वर्गस्य पंचद्
वर्गः पंचको वर्गः दशद्वर्गः दशको वर्गः ६० सप्तनोञ्छंदसि वर्ग इत्येव तदस्य
परिमाणमितिच सप्तनः प्रातिपदिकाच्छंदसि विषयेञ्प्रत्ययो भवति वर्गेभिधेये साप्त
सप्तासृजत् ६१ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् तदस्य परिमाणमि
ति वर्त्तते वर्ग इतिनिवृत्तम् त्रिंशच्चत्वारिंशद्भ्यां ब्राह्मणे संज्ञायां डण्प्रत्ययो भव
ति तदस्य परिमाणमित्येतस्मिन्विषये ब्राह्मणेभिधेये त्रिंशदध्यायाः परिमाणमवि
शय सप्तमीत्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि चात्वारिंशानि ब्रा
ह्मणानि कानिचिदेव ब्राह्मणान्युच्यंते ६२ तदर्हति तदिति द्वितीयासमर्थादर्हतीति
वृत्तिकादर्हतीत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति श्वेतच्छत्रम
र्हति श्वैतच्छत्रिकः वास्त्रिकः शान्त्यः शान्तिकः सौवर्णिकः ६३ छेदादिभ्यो नित्यम् तद
र्हतीत्यस्यार्थविशेषणं छेदादिभ्यः शब्देभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्येत
स्मिन्नर्थे यथाविहितं प्रत्ययो भवति छेदं नित्यमर्हति छैदिकः भैदिकः छेदभेद
द्रोहदोहवर्त्तकर्षतीर्थ संप्रयोग विप्रयोग प्रेषण संप्रश्न विराग विरं
गं वैरंगिकः ६४ शीर्षच्छेदाद्यच्च नित्यमित्यनुवर्त्तते शीर्षच्छेदशब्दाद्द्वितीया
समर्थान्नित्यमर्हतीत्येतस्मिन्विषये यत्प्रत्ययो भवति चकाराट्ठञ्च शीर्षच्छे
दं नित्यमर्हति शीर्षच्छेद्यः शैर्षच्छेदिकः प्रत्ययसंनियोगेन शिरसः शीर्ष
भावो निपात्यते ६५ दण्डादिभ्यो यः नित्यमिति निवृत्तम् दंडादिभ्यः शब्देभ्यो द्वितीया
समर्थेभ्योऽर्हतीत्येतस्मिन्विषये यत्प्रत्ययो भवति ठकोपवादः दंडमर्हति दंड्यः
मुसल्यः दंड मुसल मधुपर्क कशा अर्घ मेधा मेघ उदक वधयुग ६६ छंदसि च
प्रातिपदिकमात्राच्छंदसि विषये तदर्हतीत्येतस्मिन्विषये यत्प्रत्ययो भवति ठञादी
नामपवादः उदक्यो वृत्रेय। सत्यः। प्राप्यो तः। गव्यो देयः ६७ पात्राद्घंश्च पात्रवृ

ध घनु प्रत्ययो भवति चकाराद्यश्च तदर्हतीत्येतस्मिन्विषये ठकः ठञोऽपवादः
पात्रैः परिमाणमस्याः शालिः पात्रमर्हति पात्रियः पात्र्यः ६८ कडंगरदक्षिणाच्छ च
कडंगरदक्षिणाभ्यां छः प्रत्ययो भवति चकाराद्यश्च तदर्हतीत्येतस्मिन्विषये
ठकोपवादः कडंगरमर्हति कडंगरीयः कडंगर्यः दक्षिणामर्हति दक्षिणी
यो ब्राह्मणः दक्षिण्यः अल्पाचतरस्य पदमर्हति पादेन लब्धव्यमिचाराचि क्वे
नयपासंख्याभो वंसरूच यति ६९ स्थालीबिलात् छयतावनुवर्त्तेते स्थाली
बिलशब्दाच्छयतौ प्रत्ययौ भवतः तदर्हतीत्येतस्मिन्विषये ठकोपवा
दो स्थालीबिलमर्हति स्थालीबिलीयास्तण्डुलाः स्थालीबिल्याः पाकयोग्या इ
त्यर्थः ७० यज्ञर्त्विग्भ्यां घखञौ यज्ञशब्दादृत्विक्शब्दाच्च यथासंख्यं घखञौ
प्रत्ययौ भवतः तदर्हतीत्येतस्मिन्नर्थे ठकोपवादौ यज्ञियो ब्राह्मणः आर्त्वि
जीनो ब्राह्मणः यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् यज्ञकर्मार्हतीति य
ज्ञियो देशः ऋत्विक्कर्मार्हतीति आर्त्विजीनं ब्राह्मणकुलम् आर्त्विजीयाणां वेदादि
नापूर्णो विधिः अच पर्यवसानीयमेव भवति ७१ पारायणतुरायणचान्द्रा
यणं वर्तयति समर्थविभक्तिरनुवर्तते तदर्हतीति निवृत्तम् पारायणतुरायणचान्द्रा
यणेभ्यो समर्थेभ्यो वर्तयतीत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति पारायणं द्विजो व
र्तयति पारायणिकः छात्रः तुरायणं यज्ञं वर्तयति तौरायणिको यजमानः चा
न्द्रायणं वर्तयति चान्द्रायणिकस्तपस्वी ७२ संशयमापन्नः संशयशब्दाद् द्वि
तीयासमर्थादापन्न इत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति संशयमापन्नः सां
शयिकः स्थाणुः ७३ योजनं गच्छति योजनशब्दाद् द्वितीयासमर्थाद् गच्छतीत्येत
स्मिन्नर्थे ठञ्प्रत्ययो भवति योजनं गच्छति यौजनिकः क्रोशशतयोजनशता
यो रुपसंख्यानं क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः यौजनशति
कः आचार्यः ७४ पथः ष्कन् पथिन्शब्दाद् द्वितीयासमर्थाद् गच्छतीत्येतस्मिन्नुन

र्थे ष्कन् प्रत्ययो भवति नकारः स्वरार्थः षकारो ङीबर्थः । पथानं गच्छति पथिकः । प
थिकी ७५ पंथो ण नित्यम् नित्यग्रहणं ष्कन्प्रत्ययार्थे विशेषणम् । पथः पंथादे
शः प्रत्ययमादेशो भवति णश्च प्रत्ययः । नित्यं गच्छतीति पांथः तस्मिन्नर्थे पंथानं नि
त्यं गच्छतीति पांथो मितिद्रोयाच्यते नित्यमिति किम् पथिकः । ७६ उत्तरपथेना
हृतं च तेनेति तृणादेव समर्थविभक्तिः । उत्तरपथशब्दात् तृतीयासमर्थादाहृ
तमित्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति चकारः प्रत्ययार्थं समुच्चिनोति गच्छ
तीति तिच गच्छापि तृतीयैव समर्थविभक्तिः । उत्तरपथेनाहृतं औत्तरपथि
कं उत्तरपथेन गच्छति औत्तरपथिकः । आहृतप्रकरणे वारिजंगलस्थलकां
तारपूर्वादुपसंख्यानम् । वारिपथेनाहृतं वारिपथिकं वारिपथेन गच्छ
ति वारिपथिकः । जंगलपथेनाहृतं जांगलपथिकम् । जंगलपथेन गच्छ
गलपथिकः । स्थलपथेनाहृतं स्थालपथिकम् । स्थलपथेन गच्छति जां
थिकः । कांतारपथेनाहृतं कांतारपथिकं कांतारपथेन गच्छति कांतारपथिकः । स्थालप
जपथशंकुपथाभ्यां चोपसंख्यानम् अजपथेनाहृतमाजपथिकम् । अ
पथेन गच्छति आजपथिकः । शंकुपथेनाहृतं शांकुपथिकम् । शंकुपथेन गच्छति
शांकुपथिकः । मधुकमरिचयोरण् स्थलात् । स्थलपथेनाहृतं स्थालपथम् मधु
कम् स्थालपथम् मरीचम् । ७७ कालात् कालादित्यधिकारोऽयम् यदित ऊर्ध्वमनु
क्रमिष्यामः कालादित्येवं तद्वेदितव्यम् वक्ष्यति तेन निर्वृत्ते मासेन निर्वृत्तं
मासिकम् आर्द्धमासिकम् सांवत्सरिकम् कालादित्यधिकारो यावद् दिभ्यो लि
ति योगम् ७८ तेन निर्वृत्तम् तेनेति तृतीयासमर्थात् कालवाचिनः प्राति
पदिकान्निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितं ठञ् प्रत्ययो भवति अह्ना निर्वृत्तं
आह्निकम् मासिकं सांवत्सरिकम् ७९ तमधीष्टो भृतो भूतो भावी तमिति द्विती
या समर्थात्कालवाचिनः प्रातिपदिकादधीष्टो भृतो भूतो भावी इत्येतेष्वर्थेषु

ठञ्प्रत्ययो भवति अधीष्टः सत्कृत्य व्यापारितः भृतो वेतनेन क्रीतः भूतः
स्वसत्तया व्याप्तकालः भावी तावन्तमेव कालमागतः तमिति कालाद्ध्वनोर
त्यन्तसंयोगे इति द्वितीया मासमधीष्टः मासिकोऽध्यापकः मासं भृतो मासि
कः कर्मकरः मासं भूतः मासिको व्याधिः मासं भावी मासिक उत्सवः ननु
चाध्येषणा च भरणं च भूतत्वं क्रियते तेन कथं मासो व्याप्यते तदुच्यते
अध्येषणाभरणे क्रियावाचके तत्र फलभूतया क्रियया मासो व्याप्यमानस्तामा
मेव व्याप्नोतीत्युच्यते ८० मासाद्वयसि यत्खञौ मासशब्दाद्वयसि अभिधेये
यत्खञौ प्रत्ययौ भवतः ठञोपवादो अधीष्टादीनां चतुर्णामभिधेयानामपि सामा
न्याद्भूतेन तदभिसंबध्यते मासं भूतः मास्यः मासीनः वयसीति किम् मा
सिकः ८१ द्विगोर्यप् मासाद्वयसीति वर्त्तते मासान्तान्नाद्द्विगोर्यप्प्रत्ययो भ
वति वयस्यभिधेये द्वौ मासौ भूतः द्विमास्यः त्रिमास्यः ८२ षण्मासाण्ण्यच्च वय
सि ण्यच्च षण्मासशब्दाद्वयस्यभिधेये ण्यप्रत्ययो भवति यपौ सन्नियोगे चय
निष्ठुते सच कोपेन समुच्चीयते स्वरितत्वोच्चारणं तयोरनुवर्त्तिष्यते तेन ठञपि
भवति षाण्मास्यः षण्मास्यः षाण्मासिकः ८३ अवयसि ठंश्च षण्मासशब्दाद
वयस्यभिधेये ठन्प्रत्ययो भवति चकारो ण्यतः समुच्चयार्थः षाण्मासिकः षाण्मा
सिको रोगः षाण्मास्यः ८४ समायाः खः अधीष्टादयस्त्रयोऽनुवर्त्तन्ते ताव
द्द्वितीयासमर्थात् अधीष्टादिषु वर्षेषु खल्प्रत्ययो भवति ठञोपवादः समाम
धीष्टो वा भृतो वा भूतो वा भावी वा समीनः केचित्तु तेन निर्वृत्तं इत्यपि सर्वत्रानु
वर्त्तयन्ति समया निर्वृत्तं समीनं ८५ द्विगोर्वा समायाः सर्वत्रानु
द्विगोर्निर्वृत्तादिषु पञ्चस्वर्थेषु वा खः प्रत्ययो भवति पूर्वेण नित्यः प्राप्तो वि
कल्प्यते प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति प्राप्तिः तेन म
ते पक्षे ठञ्प्रत्ययो भवति द्वि समीनः द्वैसमिकः त्रिसमीनः त्रैसमिकः द्वि

रात्र्यहःसंवत्सराच्च ॥ द्विगोर्नित्यमेव रात्रि अहन् संवत्सर इत्येवमन्तान्नृ द्विगो
र्निर्वृत्तादिषु अर्थेषु खप्रत्ययो भवति तेन मुक्ते ठञ् भवति । द्विरात्रिकः ।
त्रिरात्रीणः । त्रैरात्रिकः । द्व्यहीनः । द्वैयह्निकः । त्र्यहीनः । त्रैयह्निकः । द्विसंव
त्सरीणः । द्विसांवत्सरिकः । त्रिसंवत्सरीणः । त्रिसांवत्सरिकः । संख्यायाः
संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः । ८८ वर्षाल्लुक् च ॥ द्विगोर्नित्यमेव वर्ष
शब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु खप्रत्ययो भवति पक्षे ठञ् तयोश्च वा
लुग्भवति तदेवं त्रीणि रूपाणि संपद्यन्ते द्विवर्षीणो व्याधिः । द्विवार्षिकः । द्वि
वर्षः । त्रिवर्षीणः । त्रिवार्षिकः । त्रिवर्षः । वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः ।
भाविनि तु त्रैवर्षिकः । ८९ चित्तवति नित्यम् ॥ चित्तवति प्रत्ययार्थेऽभिधेये
वर्षशब्दान्ताद् द्विगोर्नित्यं प्रत्ययस्य लुग्भवति पूर्वेण विकल्पे प्राप्ते । वचनम्
। द्विवर्षो दारकः । त्रिवर्षः । चित्तवतीति किम् द्विवर्षीणो व्याधिः । ९० षष्टिकाः षष्टि
रात्रेण पच्यन्ते षष्टिकाद्यो निपात्यते बहुवचनमतन्त्रम् षष्टिरात्रेणेत्युक्ता षष्टि
तीसमर्थाच्च पच्यमाने इत्येतस्मिन्नर्थे कन्प्रत्ययो निपात्यते रात्रेरुत्तरपदस्य च लो
पः । षष्टिरात्रेण पच्यन्ते षष्टिकाः । तेत्रौषधीन्यावि... विशेषस्य नेमुत्तरपदस्य च लो
पः संज्ञेन भवति । ९१ वत्सरान्ताच्छश्छन्दसि ॥ वत्सरान्तात् प्रातिपदिकान्निर्वृत्ता
दिष्वर्थेषु छन्दसि विषये छप्रत्ययो भवति ठञोऽपवादः । इद्वत्सरीयः । परिवत्स
रीयः । ९२ संपरिपूर्वात्ख च ॥ संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये
निर्वृत्तादिष्वर्थेषु खप्रत्ययो भवति चकाराच्छश्च संवत्सरीणः संवत्सरीयः । परिवत्सरी
णः । परिवत्सरीयः । ९३ तेन परिजय्यलभ्यकार्यसुकरम् ॥ तेनेति तृतीयासमर्था
त्कालवाचिनः शब्दात्परिजय्यादिष्वर्थेषु ठञ्प्रत्ययो भवति मासेन परिज
य्यः । शक्यते परिजेतुम् मासिको व्याधिः । सांवत्सरिकः । मासेन लभ्यः । मासिकः ।

८८: मासेन कार्यं मासिकं चान्द्रायणम्। मासेन सुकरः मासिकः प्रासादः। ९४ त
दस्य ब्रह्मचर्यम्। तदिति। द्वितीयासमर्थाद्विभक्तेः रत्यंतसंयोगे अस्येति प्र
त्ययार्थे। ब्रह्मचर्यशब्दाभ्यामभिसंबध्यते कालस्य व्यापकं प्रत्ययार्थे स्वव
चनम्। तदिति द्वितीयासमर्थात्कालवाचिनः। ठञादयस्येति षष्ठ्यर्थे ठञ्प्रत्य
यो भवति। ब्रह्मचर्यं चेद्गम्यते। मासं ब्रह्मचर्यमस्य ब्रह्मचारिणः। मासिको
ब्रह्मचारी। आर्द्धमासिकः। सांवत्सरिकः। अपरा वृत्तिः। तदिति प्रथमासमर्था
दस्येति षष्ठ्यर्थे ठञ्प्रत्ययो भवति यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेत्तद्भव
ति मासोऽस्य ब्रह्मचर्यस्य मासिकम् ब्रह्मचर्यम्। आर्द्धमासिकम्। सांवत्स
रिकम्। पूर्वत्र ब्रह्मचारी प्रत्ययार्थः। उत्तरत्र ब्रह्मचर्यमेव विषयसचित्वात्त्रयो
माणाम् उभयथा सूत्रप्रणयनात्। महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्यः उपसं
ख्यानम्। महानाम्न्यो नाम ऋचस्तासां चरितं व्रतं तस्येच्छेन्नोच्यते महाना
म्नीश्चरति माहानाम्निकः। आदित्यव्रतिकः। गौदानिकः। अवान्तरदीक्षादिभ्यो
डिनिर्वक्तव्यः। अवान्तरदीक्षी। तिलव्रती। अष्टाचत्वारिंशतो ड्वुन् डिनिश्च वक्तव्यः।
अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति अष्टाचत्वारिंशकः। अष्टाचत्वारिंशी। चातु
र्मास्यानां लोपश्च ड्वुन् डिनी च प्रत्ययौ वक्तव्यौ चातुर्मास्यानि चरति चातुर्मास
कः। चातुर्मासी। चतुर्मासाण्ण्यो यज्ञे तत्र भवे चतुर्षु मासेषु भवानि चातुर्मास्या
नि संज्ञायामण् वक्तव्यः। चतुर्षु मासेषु भवा चातुर्मासी पौर्णमासी। आषाढी का
र्तिकी फाल्गुनीति ९५ तस्य दक्षिणा यज्ञाख्येभ्यः। तस्येति षष्ठीसमर्थेभ्यो यज्ञा
ख्येभ्यः प्रातिपदिकेभ्यो दक्षिणेऽस्मिन्नर्थे ठञ्प्रत्ययो भवति। अग्निष्टोमस्य
दक्षिणा आग्निष्टोमिकी। राजसूयिकी। वाजपेयिकी। आख्याग्रहणमकालार्थे
पि यज्ञवाचिनो यथा स्यात्। इह मा भूत्। त्रैकालिकाधिकारादेकाहद्वादशाहयो
र्भवत्वयज्ञाग्रहणमन्। प्रातः। संख्यापूर्वपदानां तदन्तग्रहणमलुकीति

कालाधिकारेपि ष्ठाद्ठञादिषु प्राप्तेषु संग्रः ९६ तत्र च दीयते कार्यं भववत् तत्रेति स
प्तमीसमर्थात् कालवाचिनः प्रातिपदिकाद्दीयते कार्यमित्येतयोरर्थयो
र्भवत्प्रत्यया भवन्ति यथा मासे भवं मासिकं एवं मासे दीयते कार्यं वा मासि
कम् आर्द्धमासिकम् सांवत्सरिकम् प्रावृषेण्यम् शारदम् वासन्तिकम् हैम
न्तिकम् हैमनम् वासंतम् वसिः सर्वे साहचर्यात् योगविभागश्चात्र कर्त
व्यः तत्र दीयते यज्ञाख्येभ्य इत्येव आग्निष्टोमे दीयते आग्निष्टोमिकम् राजसू
यिकम् वाजपेयिकम् कालाधिकारस्य पूर्णो विधिः अतः परं सामान्येन प्रत्य
यविधानम् ९७ व्युष्टादिभ्योऽण् तत्रेत्येव तत्रेति सप्तमीसमर्थेभ्यो व्युष्टा
दिभ्यो दीयते कार्यमित्येतयोरर्थयोरण्प्रत्ययो भवति व्युष्टे दीयते कार्यं वा
वैयुष्टम् नैत्यम् आग्निपदादिभ्य उपसंख्यानं वाचकेप्यम् अत्रैव वृत्ती
पठिताः आग्निपदं पैलुमूलम् व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण ती
र्थ आस्तरण संग्राम संघात अग्निपद पीलुमूल प्रवास ९८ तेन यथाकथाच
हस्ताभ्यां णयतौ दीयते कार्यमित्यनुवर्तते तेनेति तृतीयासमर्थाभ्यां यथा
कथाच हस्त शब्दाभ्यां णयतौ प्रत्ययौ भवतः दीयते कार्यमित्यनुवर्तते तेनेति तृ
तीयासमर्थाभ्यां यथाकथाच ॥ दीयते कार्यमित्येतयोः अर्थयोः । वृत्तिकारमते संबंध
ये यथासंख्यं नेष्यते यथाकथाच हस्ताभ्यां समुदाययोर्नादरेण दीयते तृतीया
र्थे मात्र चात्र संभवति ननु तृतीयासमर्थविभक्तिः यथाकथाच दीयते तृतीया
यथाचम् हस्तेन दीयते कार्यं वा हस्त्यम् ९९ संपादिनि तेनेत्येव तृतीयासम
र्थात् संपादिनीत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति गुणोत्कर्षः संपत्तिः आवरूपकं
तिनिः कर्णवेष्टकाभ्यां संपादि मुखं कार्णवेष्टकिकं वास्त्रयुगिकं शरीरमुक्त
वस्त्रयुगाभ्यां शोभनं कर्मभेदशब्दसमुच्चयः ९९ कर्मवेषाद्यत् कर्मवेषादिभ्यः संपादि
मुखं कार्णवेष्टकिकम् वास्त्रयुगिकम् शरीरम् वस्त्रयुगाभ्यां शोभनं ९९ कर्म

वेणाद्यत् कर्मवेषाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति संपादि इत्ये
तस्मिन्विषये ठञोऽपवादः कर्मणा संपद्यते कर्मण्यं शौर्यम् वेषेण संपद्यते वे
ष्यो नटः। तस्मै प्रभवति संतापादिभ्यः तस्मै इति चतुर्थीसमर्थेभ्यः संता
पादिभ्यः प्रभवतीत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। समर्थः शक्तः प्रभवती
त्युच्यते अलमर्थी च तुर्थी सांतापाय प्रभवति सांतापिकः सांनाहिकः सांग्रा
मिकः संताप संनाह संग्राम संपराय संपेष संवेशन निष्पेष सर्ग विसर्ग
उपसर्ग प्रवास उपवास संघात संमोदन संकु मांसौदनादि गृहीतादापि
। योगाद्यच्च योगशब्दाद्यत्प्रत्ययो भवति चकारात् ठञ् च तस्मै प्रभवतीत्येत
स्मिन्विषये योगाय प्रभवति योग्यः यौगिकः। कर्मण उकञ् कर्मन् शब्दात्
उकञ् प्रत्ययो भवति तस्मै प्रभवतीत्येतस्मिन्विषये कर्मणे प्रभवति कार्मुकं
धनुः। समयस्तदस्य प्राप्तम् समयशब्दात्तदिति प्रथमासमर्थादस्येति षष्ठ्य
र्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेत्तद्भवति समयः प्राप्तोऽस्य
सामयिकं कार्यम् उपनतः काल इत्यर्थः। समर्थविभक्तिनिर्देशादेव इत्यन्वेति। ऋतोर
ण् तदस्य प्राप्तमित्यनुवर्तते ऋतुशब्दात्तदिति प्रथमासमर्थात् षष्ठ्यधिका
देशे विषये अण् प्रत्ययो भवति ऋतुः प्राप्तोऽस्य आर्तवं पुष्पम् आर्तवं फ
लम् तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् उपवस्त्रा प्राप्तोऽस्य औपवस्त्र
कम् प्राशिता प्राप्तोऽस्य प्राशितृकम्। छन्दसि घस् ऋतुशब्दात् छन्दसि विषये घस्प्र
त्ययो भवति तदस्य प्राप्तमित्येतस्मिन्विषये ऽस्याणोऽपवादः। अयं ते योनिर्ऋत्वियो
यतो जातो अरोचथाः। कालाद्यत् कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्त
मिति निर्वृत्तम् प्रकर्षेण कालो विद्युत्पाते प्रकृष्टे प्रकर्षे वर्तमानात् कालश
ब्दात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ्प्रत्ययो भवति प्रकृष्टो दीर्घः कालोऽस्ये
ति कालिकं वैरम्। ठञ्ग्रहणं विस्पष्टार्थम्। प्रयोजनम् तदस्येत्यनुवर्तते तद
ति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ्प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्र

का
शि
१८२

योजने चेन्न द्रवति ॥८॥ भ्वमन्तः प्रयोजनमस्य ऐन्द्रमहिकम् गांगामहिकं ॥९॥ वि
ज्ञातलोपार्थं दाक्षि यदंडयोः ॥ विज्ञातलोपार्थं कर्तृत्वाभावात् प्रयोजनमस्य योग्यता भवति
यथा संख्यमर्थे यदंड्योरस्ये योः तदस्यप्रयोजनमस्मिंस्त्वेतस्मिंस्तिविषये वि
ज्ञातलोपे योजनस्यवैनैगुणलोमे यः आगतोर्दण्डः चूडादिभ्य उपसंख्या
नम् चूडाप्रयोजनमस्य चौडम् श्रद्धाप्रयोजनमस्य श्राद्धम् ॥१०॥ अनुप्रव
चनादिभ्यश्छः अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति
तदस्य प्रयोजनमित्येतस्मिन्विषये ठञोपवादः अनुप्रवचनं प्र
योजनमस्य अनुप्रवचनीयम् उत्थापनीयम् विशिप्रविशिपातिरुहिपदि
प्रकृतेर्मनान्तपूर्वपदात् प्रसंख्यानम् गृहप्रवेशनं प्रयोजनमस्य गृ
हप्रवेशनीयम् प्रपापूरणीयम् अश्वप्रपतनीयम् प्रासादारोहणीय
म् गोप्रपदनीयं स्वर्गादिभ्यो यद्वक्तव्यः स्वर्ग्यं प्रयोजनमस्य स्वर्ग्यम् धन्यं य
शस्यं आयुष्यम् काम्यम् पुण्याहवाचनादिभ्यो लुग्वक्तव्यः पुण्याहवाचनं
प्रयोजनमस्य पुण्याहवचनम् स्वस्तिवाचनं शान्तिवाचनम् अनुप्रवचना
दि ॥ समापनात्सपूर्वपदात् समापनशब्दात् विद्यमानपूर्वपदात् छः प्रत्ययो भ
वति तदस्य प्रयोजनमित्येतस्मिन् विषये ठञोपवादः छन्दः समापनं प्र
योजनमस्य छन्दः समापनीयम् पदव्याकरणं वेदवृत्ति निर्दशानीयम् ॥१२॥ ऐकागा
रिकट् चौरे ॥ निपात्यते चौरेभिधेये एकागारं प्रयोजनमस्य ऐकागारिकश्चौरः
एकागारिकशब्दो निपात्यते तावदर्थ प्रयोजनमित्येवं ठञ् सिद्धः चौरे नि
यमार्थे निपातनम् एकागारं प्रयोजनमस्य भिक्षोः ऐकागारिकः कायोव
धारणार्थो डीनवभवति नर्तिस्त्वरीमपर्द्धं कं प्रत्यये वृद्धिः च निपात्यते
॥१३॥ आकालिकडाद्यन्तवचने आकालिकडिति निपात्यते आद्यन्तवचने
समानकालस्य आकालिकत्वमादेशः आद्यंतौ चाविशेषणं एकः कालः

यो निपात्यते समानकालावाद्यंतावस्य आकालिकः। लूनयवस्तुः आकालिकी विद्यु-
त् जन्मनानुतुल्यकालविनाशा उत्पादानंतरविनाशिनीत्यर्थः। आकालाट्ठश्च
वक्तव्यः। आकालिकी आकालिका विद्युत् उक्तः। पूर्वो विधिः॥ १४ तेन तुल्यं क्रिया
चेद्वतिः। तेनेति तृतीयासमर्थात्तुल्यमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति
यत्तत्तुल्यं क्रिया चेत्सा भवति ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत्। क्षत्रियव-
त्। राजवत्तत्क्रियाग्रहणं किम्। गुणतुल्ये माभूत्। पुत्रेण तुल्यः स्थूलः। पुत्रेण
तुल्यः पिंगलः॥ १५ तत्र तस्येव। तत्रेति तस्येति सप्तमीसमर्थात् षष्ठीसमर्था-
च्च इवार्थे वतिः प्रत्ययो भवति मथुरायामिव मथुरावत्। स्रुघ्ने प्राकारः। पा-
टलिपुत्रवत्साकेते परिखा। षष्ठीसमर्थात्। देवदत्तस्येव देवदत्तवत् यज्ञ-
दत्तस्य गावः। देवदत्तवत् यज्ञदत्तस्य दंताः॥ १६ तदर्हम्। तदिति द्वितीयासमर्था-
दर्हतीत्येतस्मिन्नर्थे वतिः प्रत्ययो भवति राजानमर्हति राजवद्वृत्तम् ब्रा-
ह्मणवत्। क्षत्रियवत्॥ १७ उपसर्गाच्छंदसि धात्वर्थे। उपसर्गात्साधने धात्वर्थे
वर्तमानात् वतिः प्रत्ययो भवति छंदसि विषये यदुद्वतो निवतो यासि बप्स-
त्। उद्गतानि निगतानि च॥ १८ तस्य भावस्त्वतलौ। तस्येति षष्ठीसमर्थाद्भाव इत्ये-
तस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः। भवतोस्मादभिधानप्रत्ययाविति भावः। श-
ब्दप्रवृत्तिनिमित्तं भाव उच्यते अश्वस्य भावः अश्वत्वं अश्वता त्वंगोत्व
१९ आ च त्वात्। ब्रह्मणस्त्व इति वक्ष्यति आ एतस्मात्त्वसंशब्दानात् यानित ऊर्ध्व-
मनुक्रमिष्यामः त्वतलौ प्रत्ययौ तत्राधिकृतौ वेदितव्यौ वक्ष्यति पृथ्वादिभ्य
इमनिच्। प्रथिमा पार्थवं पृथुत्वं पृथुता म्रदिमा मार्दवं मृदुत्वं मृदुता। अपवा-
दैः सह समावेशार्थं वचनम्। कर्मणि च विधानार्थं गुणवचनब्राह्मणादि-
भ्यः कर्मणि चेति चकारो नञ्स्नञ्भ्यां समावेशार्थः। स्त्रिया भावः स्त्रैणं

त्वं स्त्रीता पौंस्त्वं पुंस्ता २० न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवण
वटयुधकतरसलसेभ्यः इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषा
न्न भवन्ति चतुरादीन्वर्जयित्वा। पत्यन्तपुरोहितादिभ्यो यगिति अप
तित्वं अपतिता अपटुत्वं अपटुता अरमणीयत्वम् अरमणीयता नञ्पू
र्वादिति किम् वार्हस्पत्यम् प्राजापत्यम्। तत्पुरुषादिति। किम् नास्ति पटुर्यस्य सं
ति अपटुः तस्य भावः आपटवम् आलघवम्। अचतुरादिभ्य इति किम् आच
तुर्यम् आसंगत्यम् आलवण्यम् आवट्यम् आयुध्यम् आकत्यम् आरस्यम्
आलस्यम् २१ पृथ्वादिभ्य इमनिज्वा पृथ्वादिभ्यः [illegible] प्रातिपदिकेभ्यो वा
इमनिच्प्रत्ययो भवति तस्य भाव इत्येतस्मिन्नर्थे वावचनमणादिसमावे
शार्थं पृथोर्भावः प्रथिमा पार्थवमेवम् म्रदिमा मार्दवम् त्वतलौ तु सर्वत्र भवत
एव पृथुत्वं पृथुता मृदुत्वं मृदुता पृथु मृदु महत् पटु तनु लघु बहु सा
धु आशु उरु गुरु बहुल खण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द
ऋजु ह्रस्व दीर्घ क्षिप्र क्षुद्र प्रिय २२ वर्णदृढादिभ्यः ष्यञ्च वर्णविशेषवाचिभ्यः
प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ्प्रत्ययो भवति चकारादिमनिच्च तस्य भाव
इत्येतस्मिन्विषये शुक्लस्य भावः शौक्ल्यं शुक्लिमा शुक्लत्वं शुक्लता कार्ष्ण्यं कृष्णि
मा कृष्णत्वं कृष्णता दृढादिभ्यः खल्वपि दार्ढ्यं द्रढिमा दृढत्वं दृढता चकारोऽशे
षार्थः औचिती याथाकामी दृढ परिवृढ कृश चक्र आम्र कृष्ट लवण आम्ल वैया
त्वला नमति मनः [illegible] समो मति मनसो [illegible] जड बधिर मूक मू
र्ख पण्डित मधुर २३ गुणवचनब्राह्मणादिभ्यः कर्मणि च गुणमुक्तवन्तो गुणवच
नाः गुणवचनेभ्यः शब्देभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभि
धेये ष्यञ्प्रत्ययो भवति चकाराद्भावे च कर्मशब्दः क्रियावचनः जडस्य कर्म भा
वो वा जाड्यम् मौढ्यम् ब्राह्मणादिभ्यः खल्वपि ब्राह्मण्यम् माणव्यम् अप

१५४

दपरिसमाप्ते भावकर्माधिकारः आल्लणादिभ्यो कृतिगणः आदिशब्दः प्रकारे च
तुर्वर्णादीनां स्वार्थे उपसंख्यानम् चत्वार एव वर्णाश्चातुर्वर्ण्यं चातुरा
श्रम्यम् चातुर्वेद्यं सार्ववैद्यम् त्रैस्वर्यम् षाड्गुण्यं सैन्यम् सांनिध्यं सामी
प्यम् औपम्यम् चैतिह्यम् माणिक्यम् त्रैलोक्यम् आल्लणमाणव चाडव ग्र
र्हतो नुम् च वा सहयुक्ते आराधय विराधय अपराधय उपराधय एकभाव द्विभा
व त्रिभाव स्वभाव अन्यतरन् संवादिन् संवेष्टिन् सभाबिन् बहुभाविन् शी
र्षघातिन् विघातिन् निघातिन् निपातिन् समस्य विषमस्य परमस्य मध्यस्य
अनीश्वर चपल कुतूहल निपुण पिशुन बालिश अलस दुःपुरुष कापुरु
ष कापुरुष राजपुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विष
म विपात निपात सर्ववेदादिभ्यः दार्थे चतुर्वेदस्योभय पदवृद्धिश्च प्रश्ने
नो यत्न लोपश्च स्तेनस्य कार्षणी समर्थाद्भाव कर्मणोरर्थयोर्यत्प्रत्ययो भ
वति नस्य च लोपः स्तेनस्य भावः कर्म वा स्तेयम् स्तेनादित्यो गविभागं
कुर्वंति स्तेयम् अत्र भवति स्तेन्यम् ततो यन्न लोपश्च स्तेय मिति २५ सख्युर्यः
सखित्वाद्यो यः प्रत्ययो भवति भावकर्मणोरर्थयोः सख्युर्भावः कर्म वा सख्यम्
दूतवणिग्भ्यां वेति वक्तव्यम् दूत्यं वणिज्यम् सखित्वं सखिता दूतत्वं दूतता
वणिक्त्वं वणिक्ता कपयाणिज्यं ज्ञो सृणादित्वात् २६ कपिज्ञात्योर्ढक् कपिज्ञाति
भ्यां भावे ढक् प्रत्ययो भवति भावकर्मणोरभिधेययोः कपेर्भावः कर्म वा कापेय
म् ज्ञातेयम् यथा सख्यम् अर्थयोः सर्वत्रैव पत्यंतपुरो
हितादिभ्यो यक् पत्यंतात्प्रातिपदिकान्पुरोहितादिभ्यश्च यक् प्रत्ययो भवति भा
वकर्मणोरर्थयोः सेनापतेर्भावः कर्म वा सैनापत्यम् प्राजापत्यम् पुरोहिता
दिभ्यः खल्वपि चौरोहित्यम् राज्यम् पुरोहित राजन् ग्रामिक खंडिक
